International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 06-08
© 2025 IJMH
www.themultijournal.com
Received: 03-07-2025
Accepted: 08-07-2025
Publish : 09-07-2025

**अनिता महान्त**
शोधछात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अनिता महान्त**
शोधछात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# श्रीप्रतापचन्द्रचरितमहाकाव्ये उत्कलराज्यगौरववर्णनम्

**अनिता महान्त**

साहित्यसृष्टिः विरिञ्चि सुष्टेः विलक्षणा। ब्रह्मसृष्टिः अदृष्टः कर्मफलैः नियन्त्रिता भवति, परन्तु कविसृष्टिः अद्भुतः। यत्र ब्रह्मसृष्टेः षड्रसाः वर्त्तन्ते तत्र कविसृष्टेः नवरसाः नित्यनूतनाः इति। विश्वंयथा रोचते तथा परिवर्तयितुं कवयः शक्नुवन्ति इति। जगति अविद्यमानान् अपि अंशान् वर्णयितुं शक्नुवन्ति, विद्यमानस्यापि अविद्यमानत्वेन वर्णयितुं प्रभवन्ति इति तदर्थं विद्यते–

**अपारे काव्यसंसारे कविरेव प्रजापतिः।**
**यथास्मौ रोचते विश्वं तथेदं परिवर्त्तते।।**[1]

इत्युक्त वचनानुसारेण कविः प्रजापतिरिव लोककल्याणं करोति। संसारदुःखदावाग्नि प्रपिडितानां जनानांकृते कविः काव्यं विरचयति। लोकहितं मनसि विचिन्त्य व्यवहार-धर्म-सामाजिक प्रवृद्ध्यर्थं कविः सततं प्रयत्नं करोति। तदर्थं कवयः क्रान्तदर्शिनः । कविः स्व यशो निमित्तं सदासर्वदा अजरामरः इति भर्तुहरिणा नितीशतके उटङ्कितः।

**उत्कलराज्यगौरववर्णनम् -**

यद्यपि उत्कलस्य परिचयविषये स्कन्दपुराणादिग्रन्थेषु समपलभ्यते तथापि कपिलसंहितायां स्वतन्त्रतया उत्कलस्य परिचयविषये विद्यते यत् –

**वर्णाणां भारतश्रेष्ठो देशानामुत्कलःस्मृतः।**
**उत्कलस्य समो देशो देशो नास्ति महीतले ।।**[2]

कविः उत्कलस्य परिचयप्रदानावसरे वदति- यथा नारायणस्य वक्षसि कौस्तुभामणिः शोभते तथैव भारतमातुः शरीरेओड़ीसाराज्यं सुन्दरं दृश्यते।अत एव ओडिशा भवति भारतस्य वक्षस्थल इति सगर्वमुद्घोषयामि ।काव्ये यथा-

**उडिशा भारते देशे तथास्ति कौस्तुभं यथा।**
**श्रीमन्नारायणस्यैव वक्षस्थले प्रशोभते॥**[3]

उत्कलस्य परमाराध्यदेवः कोटिकैवल्यनाथः अखिलाण्डकोटिब्रह्माण्डनायकः महाप्रभु श्रीजगन्नाथः महोदधितीरे शङ्खचक्रगदा इत्यादीनि शस्त्राणि धारयन् निवसति। भारतीयधर्मधारायाः श्रेष्ठोपास्यदेवतारूपेण जगन्नाथः उपासनाजगति एकः प्रतीकात्मकः अभिव्यक्तिर्भवति। तद्यथा-

**सत्र विराजते नाथो जगन्नाथो महाप्रभुः।**
**शंखचक्रगदापद्महस्तो नारायणो हरिः ।।**[4]

ओडिशाराज्यं विविधकलानां कृते महान् प्रदेशः अस्ति। उत्कृष्टकालायाः देशः उत्कल इत्युच्यते। उत्कलस्य अपरनामः उड्रः - कलिङ्गः इति नाम्नाख्यातः। कलिङ्गा साहसिकाः उत्युक्ति प्रायतः सुभाषिते दृग्गोचरीभुतो भवति। श्री बीजुपट्टनायकः अस्य सुभाषितस्य जीवन्तं प्रमाणम् इति नास्ति सन्देहः। किमर्थं इण्डोनेसिआसरकारः विजुपट्टनायकस्य कृते भूमिपुत्रः सम्मान प्रदत्तवान् तत् सर्वजनविदितमेव। अस्माकं पूर्वराष्ट्रपतिः अब्दुलकलाममहोदयः अपि स्वस्य आत्मकथायां ओडिशाराज्यस्य वैभवस्य विषये विस्तरेण वर्णनं कृतवान् इति प्रमाणं विद्यते। तदनुशृत्य कविः लिखति–

**कलिङ्गाः साहसिका हि सुप्रसिद्धं सुभाषितम्।**

**तस्यैव प्रमाणमेकं श्रीविजुपट्टनायकः।।**
**ए पी जेऽब्दुलकलामो यस्य कीर्तिं समुज्वलाम्।**
**स्वात्मकथावृत्ते रम्ये वर्णयति सविस्तरम्।।**[5]

उत्कले अनेकाः महात्मनाः लब्धजन्माः। तेषु उत्कलमणिगोपवन्धुः अन्यतमम्। तस्य काव्यं सर्वेषा आवालवृद्धवनितानां उत्कलीयानां मुखे स्वतप्रवृत्तभावेन निःसरति ।यथा-

**मिशुमोरदेह ए देशमाटिरे**
**देशवासि चालियाआन्तु पिठिरे।**
**देशर स्वराज्य पथे ये़ते गाड**
**पुरु तहिँ पडि मोर मांस हाड ।।**[6]

तदनुगुणं कविः काव्ये वर्णयति –

**मिश्रतु मम देहो वै देशभूमाविह भृशम्।**
**मम पृष्ठे च गच्छन्तु सर्वे स्वदेशवासिनः ।।**[7]

पुनश्च श्री सचिरउतमहोदयस्यलघुरस्ति मम ग्रामोइति कविता अद्यापि मम मनसि वर्तते। कुन्तलाकुमार्याः काव्यं अद्यापि मम जीवनाय प्रेरणादायिनी इति वक्तुं इहे । स्फुटिष्यामि दिनेऽवश्यमद्य यद्यप्यहं कलिःइत्यादि पङ्क्तयः अद्यापि मया स्मर्यन्ते इति ।

**श्रीसचीराउतो यस्य कविता मम मानसे।**
**लघुरस्ति मम ग्रामो' नृत्यतीव प्रतिक्षणम् ।।**
**कुन्तलाकुमारीकाव्यं मम जीवनसम्बलम्।**
**स्फुटिष्यामि दिनेऽवश्यमद्य यद्यप्यहं कलिः ।।**[8]

विश्वे को वा न जानाति जयदेवमहाकविम्? महाप्रभुश्रीजगन्नाथस्य अत्यन्तप्रियकाव्यं गीतागोविन्दमहाकाव्यस्य रचयिता महाकविजयदेवः। **मधुरकोमलकान्तपदावली शृणु तदा जयदेवसरस्वतीम्** इति पद्यं सर्वेषां उत्कलीयानां हृदयकन्दरे सदासर्वदा गुञ्जरणं करोति।

**कस्य सहृदयस्यैव हृदये न विराजते।**
**गीतगोविन्दकर्ता स जयदेवो महाकविः।।**[9]

अपरः मूर्द्धन्यभूतःआलंङ्कारिकः विश्वनाथः उत्कलीयः इति को वा न जानाति ? तस्य विरचितः साहित्यदर्पणग्रन्थः संस्कृतसाहित्ये उज्वल तारकामिव। सः रसप्रियः विश्वनाथः काव्यस्य प्रामाणिकं लक्षणं जगति स्थापितवान्। यथा-

**न जानाति को वा विश्वे विश्वनाथं रसप्रियम्।**
**प्रतिष्ठितं विनिष्ठितं यस्यैव काव्यलक्षणम् ।।**[10]

पुनः आचार्यः पण्डाहोदयः उत्कलीय किविषु ये मूर्द्धनभुतः तस्योपरि सूचना प्रदता। पुनः वदति यत् -अद्यत्वे अपि कविसम्राटउपेन्द्रभञ्जस्य काव्यं बहु लोकप्रियम् अस्ति। कविगंगाधरस्य काव्यं वन्यमृगवत् मनः समाकर्षयति। तस्य तपस्विनी महाकाव्यं मम जीवनस्य सङ्गीतमस्ति इति। कविराधामोहनेन लिखितं काव्यं उद्दामसिंहम्, मायाधरमानसिंहस्य काव्यम् अद्यापि मम मन: आकर्षयन्तीति। तद्यथा-

**अद्यापि प्रियतामेति उपेन्द्रभञ्जभारती।**
**काव्यं गङ्गाधरस्यैव मनोमृगं विमुह्यति**
**तपस्विनी-महाकाव्यं मम जीवनसङ्गीतम्।**
**राधामोहनकाव्यस्योद्दामसिंहोऽपि जीवति**
**मायाधरमहामाया चित्तवने विराजते।**
**मानसिंहो महासिंहश्चाकर्षति कथं मतिम् ।।**[11]

उत्कले वैतरणीनाम्ना पवित्रा नदी प्रवहति। नद्याःतीरे माता विरजाया मन्दिरं विद्यते। सा भक्तानां दुःखनाशनकृत्वा सुखप्रदायनि च भवति। पुनः कटके कटकचण्डी मुण्डमाला इत्यादिभिः आभूषणैः विभूषिता सर्वान् क्लेशान् दूरीकरोति। उत्कलराज्यस्य राजधानी भवति भूवनेश्वरः। तत्र भक्तानां अभयप्रदानार्थं भगवतः लिङ्गराजमहादेवस्य विशालमन्दिरं उत्कलराज्यस्य कलानिधि इव सुशोभते । तद्यथा-

**लिङ्गराजो महादेवः प्रसिद्धो भुवनेश्वरः।**
**विशालं मन्दिरं यस्योत्कलकलानिधिरिव ।।**[12]

उत्कृष्टकलाक्षेत्र भवति उत्कलः। तत्र सरस्वती नानाकलाक्षेत्रे निवसति। तेषां कारणात् विविधाः कलाः निरन्तरं वर्धन्ते। उत्कलीयाः नृत्यसाहित्यादि कालायां निपुणाः सन्ति। ते चित्रकलायां यथा कुशलाः तथा तन्तुकार्यस्य अर्थात् वस्त्रर्माणस्य कार्ये अपि तथैव प्रसिद्धाः सन्ति। तन्तुकार्ये सम्बलपुरे निर्मिताः शाटिका एतावन्तः सुन्दराः सन्ति यत् ते सर्वदा नन्दनवनस्य उद्यानवत् मनः समाकर्षयन्ति। श्रृंगारादिभिः विविधभावैः परिपूर्णोऽयं सम्बलपुरस्य नृत्यं तथैव सुन्दरं मनमोहकं च भवति । नर्तकानां एषा नृत्यकला सर्वदा नवीनतायाः भावः प्रददाति इति । यथा-

**समाकर्षन्ति चित्तानि सम्बलपुरशाटिकाः।**
**यथा सा सुन्दरी रम्या नन्दनवनवाटिका॥**
**सम्बलपुरनृत्यं नो मनोमोहकमेव च।**
**नानारसपरिप्लुता नवीना नृत्यनर्तिकाः॥**[13]

उत्कलराज्यस्य रत्नरूपेण यः विश्वविख्यातः सः मुरलीवादकः पं चौरसिया हरिप्रसादः। तस्य कारणात् उत्कलराज्यस्य कीर्तिः सम्पूर्णे विश्वे प्रथिताः। साहित्यामृतसागरसदृशी श्रीप्रतिभारायमहोदया। यस्याः साहित्यकृतयः स्वमायावचनैः उत्कलराज्यं शोभयन्ति। गोपीनाथमहन्तिमहोदयस्य महान् उपन्यासःमाटिमटालः सौन्दर्यस्य सागरः इति वक्तुं शक्यते। उत्कले चिलिकां नाम विशालं ह्रदं वर्तते यत् सम्पूर्णे जगति शोभनात् प्रसिद्धिरस्ति। शीतऋतौ नानादेशतः चिलिकां प्रति पक्षीणः समागच्छन्ति। तद्दृश्यं अत्यन्तमनोहरम्। चिलिकायाः शोभां मनसि संस्थाप्य गोपबन्धुदासः 'चिलिका' इति अद्भुतं काव्यं विलिखितवान्। तदर्थं काव्ये यथा-

**विशाला चिलिका यस्मिन् विराजते मनोरमा।**
**विख्याता निखिले विश्वे स्वसौन्दर्यस्य कारणात्॥**
**तद् ह्रदं हृदि निधाय लिखितं काव्यमुत्तमम्।**
**श्रीगोपबन्धुदासेन चिलिकेति च शोभनम्॥**[14]

वयं यदि इतिहासः पश्यामः तर्हि अस्मिन् एव उत्कलराज्ये सम्राट् अशोकः भयंकरं युद्धं कृतवान् यत् अत्यन्तं दुःखदं आसीत्। इतिहासे

कलिंगयुद्धम् इति प्रसिद्धरस्ति। तस्यैव कलिङ्गयुद्धस्य कारणात् चण्डाशोकः धार्मिककार्येषु प्रवृत्तः अभवत् । युद्धस्य नरसंहारं दृष्ट्वा अशोकस्य हृदयस्य परिवर्तनं जातम्, तदनन्तरं सः जनहिताय धर्माशोकः जातम् ।

**अशोकः कृतवान् तत्र भीषर्ण समरं किल।**
**कलिङ्गयुद्धनाम्ना तदितिहासेऽस्ति दुःखदम्।।**
**धर्माशोकोऽभवत्तस्मात् स चण्डाशोक एव च।**
**चकार शुभकार्याणि जनकल्याणहेतवे ।।**[15]

उत्कलराज्यस्य सार्वजनिक विकासनिमित्तं महावीरः खारवेलः वहुप्रयत्न कृतवानीति सम्पूर्णे विश्वे प्रसिद्धिरस्ति। यस्या भूमिः वीरान् जनयति, सा आर्थिकदृष्ट्या समृद्धा न भवति। परन्तु अस्माकं जनाः सज्जनाः स्नेहाशीलाश्च। उत्कलीयाः सौम्याः, शुद्धाः, प्रेम्णः, अत्यन्तं सरलाः च सन्ति। ते उदारहृदयेन वसुधैवकुटुम्बकम् इति विचिन्तयन्ति।

कविः अत्र स्व ग्रामस्य परिचयप्रदानावसरे वदति यत् -उत्कलराज्ये ममास्ति एकं लघुग्रामम् । तत्र अखण्डलेश्वरः नाम महेश्वरदेवस्य मन्दिरः विराजितः । सः अस्माकं ग्रामवासीनां दुःखं विनाशयति। महादेवः भवति सर्वस्य जगतस्य रक्षकः।सः विश्वस्य विनाशकः। तस्य करुणा अस्माकं नितान्तमावश्यकम् ।यथा-

**लघुग्रामे ममास्ति यो महेश्वरो महावली।**
**आखण्डलेश्वरो सोऽस्ति सन्तापसिन्धुशोषकः।।**
**स रक्षकः समस्तस्य विश्वस्य च विनायकः।**
**यस्यैव करुणाकल्पमहीरुहो नः सम्बलम्।।**[16]

एतादृशः उत्कलमातुः सुपुत्रः श्रीप्रतापचन्द्रषडङ्गीमहोदयः। सः उत्कलजनन्याः दिव्यचेतनाचारुचन्द्रमा सदृशः। सः तेजस्वी सूर्यः इव भाति । यस्य जन्मः केवलं लोकानां शोकनाशाय तथा निराश्रयाणां आश्रय प्रदानाय च । काव्ये विद्यते यथा-

**उत्कलजननीदिव्यचेतनाचारुचन्द्रमाः।**
**स एव सुतरां भाति प्रभामयो विभाकरः॥**
**यम्य जन्म च लोकानां शोकनाशाय भूतले।**
**यामाश्रित्य च जीवन्ति निराश्रिता जना यतः॥**[17]

एतादृशस्य प्रतापषडङ्गीमहोदयस्य सत्कार्यं तथा जनकल्याणकार्यं चन्दनस्य गन्धवत् सम्पूर्णविश्वे प्रसारितः। अग्रीमसर्गे प्रतापषडङ्गी महोदयस्य परिचयादि वर्णितमस्ति। लोककल्याणार्थं कविः काव्यनिर्माणं करोति इति सर्वे जानन्ति। परन्तु अत्र आचार्यपण्डामहोदयः काव्यनिर्माणस्य प्रसङ्गे स्वाभिमतं प्रकटयति – यथा विनास्वार्थेन सर्वेषां हिताय वायुः प्रवहति, तथैव कविः विना स्वार्थेन सर्वान् प्रेरयितुं साहित्यस्य निर्माणं च करोति इति। काव्यं समाजस्य सर्वेषां जनानां सशक्तिकरणाय, सर्वेषां सत्कर्मणां प्रेरणायै च अमृतवत् भवति इति कवेराशयः ।

**यथा वायुर्विना स्वार्थं प्रवहति हिताय नः।**
**जनान् प्रेरयितुं विश्वे तथा करोति वै कविः ।।**[18]

**उपसंहारः -**

एवं प्रकारेण कविः उत्कलस्यमहिमा तथा उत्कलीयवीरपुत्राणां वर्णनं करोति। उत्कलीय वीरपुत्रेषु प्रतापचन्द्रषडङ्गीमहोदयः अन्यतमः इति नास्ति सन्देहः।

**सहायकग्रन्थसूची**


1. अग्निपुराणम्, गीताप्रेस गोरखपुर।
2. अमरकोषः - पण्डितशिवदत्तदधिमथः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००७ ।
3. कपिलसंहिता, चौखम्बासुरभारती, वाराणासी।
4. श्रीप्रतापचन्द्रचरितमहाकाव्यम् – डा.रविन्द्रकुमार पण्डा, न्यु भारतीयबुक् कर्पोरेशन्, 2022


**संदर्भ ग्रन्थः**

1 अ.पु. 339/10
2 क.स. 1/8
3 प्र.च.म. 5/1
4 प्र.च.म. 5/2
5 प्र.च.म. 5/5-6
6 उत्कलभाषायाम्
7 प्र.च.म. 5/8
8 प्र.च.म. 5/9-10
9 प्र.च.म. 5/11
10 प्र.च.म. 5/12
11 प्र.च.म. 5/13-15
12 प्र.च.म. 5/19
13 प्र.च.म. 5/24-25
14 प्र.च.म. 5/29-30
15 प्र.च.म. 5/31-32
16 प्र.च.म. 5/43
17 प्र.च.म. 5/45-46
18 प्र.च.म. 5/49